श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

## श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ देवतान्तरपरिसङ्ख्यास्तबकः विंशः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ देवतान्तरपरिसङ्ख्यास्तबकः विंशः ॥

वन्दारुरक्षणे दक्षां वन्दे गोविन्दसुन्दरीम्।
यत्प्रसादादृते देवाः सर्वे रक्षितुमक्षमाः॥ **20.1** ॥

अम्ब त्वया हन्त शरीरभाजाम्
अरक्षितानामपि रक्षितानाम्।
देवा मुदे वा पुनरापदे वा
भवन्ति किं ते बकवैरिकान्ते॥ **20.2** ॥

शीतस्वभावां भवतीं श्रितेभ्यो
दिव्यां समृद्धिं ददतीमतीत्य।
उपाश्रितध्वंसकमुष्णमग्निम्
उपासते के जगदम्ब लोके॥ **20.3** ॥

अज्ञाततृप्तिममिते विभवेऽपि दीन -
बन्धुं विहाय भवतीं भवतोऽप्यवन्तीम्।
सख्युः शुचेरपि समाप्तिदमम्ब कार्श्ये
कस्तं प्रभञ्जनमिहार्चतु गन्धवाहम्॥ **20.4** ॥

यमविषयगतिः स्याद्यद्गृहीतस्य जन्तोः
अमतिरमुमुपास्तामप्रभुं पाशहस्तम्।
जननि परिगृहीतत्राणजातादरां त्वाम्
अहमखिलनियन्त्रीमब्जहस्ताम् प्रपद्ये॥ **20.5** ॥

कुर्वाणं परुषैः करैः कुवलयक्लेशं भृशं सद्गुण -
श्रीहार्यभ्युदयं तमम्ब तपनं केचिन्नमस्कुर्वताम्।
विश्वानन्दकरीं वयं तु विदुषां विश्वाधिकां संपदं
तन्वानां प्रणमेम तत्रभवतीं तापत्रयध्वंसिनीम्॥ **20.6**॥

हरिसखि शतमन्युं वायसस्य स्वसूनोः
अपि विपदपनीतावक्षमं नो यजेयम्।
अहमविदितमन्युं हन्त तस्य स्वशत्रोः
अपि परिहृतभीतिं त्वां शुभामाश्रयेयम्॥ **20.7**॥

प्रौढैश्वर्यजुषोऽपि यस्य सुहृदा भिक्षाकता नोज्झिता
यत्र श्रीदपदं वदन्ति विबुधा रूढ्याऽश्वकर्णादिवत्।
यक्षं तं यजतामधीर्वयममी त्वामिष्टदात्रीं स्तुमो
मातर्लक्ष्मि महाविभूतिकमठो यस्याः सखा ते हरिः॥ **20.8**॥

प्रौढिर्यस्य हि पूर्वपक्षविदिता यो लुब्धचूडामणिः
यश्चाहीनमुखेन दूषितकलस्तं कः कलङ्काश्रयम्।
अर्चेत्सोममपामरः श्रुतिशिरः सिद्धान्तसिद्धोन्नतिं
पद्मे काङ्क्षितदां बुधस्तुतकलां त्वां निष्कलङ्कां विना॥ **20.9**॥

पद्मे येषामुच्चभावो न नित्यो
ये सर्वेऽपि स्थानभेदेन तीक्ष्णाः।
यष्टुस्तुष्टिर्न ग्रहांस्तानतस्त्वां
नित्यौन्नत्यां नौमि सर्वत्र मृद्वीम्॥ **20.10**॥

शाखावृन्दप्रथितविभवां सत्सुपर्णाधिरोहां
त्वामस्तुत्वा जलनिधिभुवं कल्पवल्लीमतल्लीम्।
आकाङ्क्षन्तः फलमविकलं देव्यपर्णोद्भवं के
संसेवेरन् शरवणभवं स्थाणुजातं विशाखम्॥ **20.11**॥

त्वां कृतश्रुतिपथप्रवर्तनां
    सज्जनादरकृताननां विना।
निर्मितश्रुतिविकम्पनं रमे
    साधुवारणमुखं श्रयेत कः॥ **20.12** ॥

दुर्गां परे गाढभवानुषङ्गां
    शिलोच्चयादभ्युदितां श्रयन्ताम्।
भक्त्यैकलभ्यां भवसिन्धुनावं
    सुधाब्धिजे त्वां तु वयं श्रयामः॥ **20.13** ॥

स्थानं यस्य श्मशानं सततमनुचरो भूतवेतालवर्गः
    चेलं चर्म स्रगस्थ्नां ततिरहह तमप्युग्रमेके भजन्ताम्।
पद्मे पद्मे स्थितां त्वामसकृदनुसृतां देवतायौवतेन
    ध्यायेम क्षौमभाजं वयमनुदिनमामुक्त मुक्ताकलापाम्॥ **20.14** ॥

नाभिजातमधरीकृतहंसं
    जन्तवः कतिपये कलयन्ताम्।
सेवते जगति हंसगतिं त्वां
    सिन्धुनन्दिनि सुधीरभिजाताम्॥ **20.15** ॥

चित्तवृत्तिरिह कञ्जमन्दिरे
    धुन्वतीं दुरितपुञ्जमिन्दिरे।
सिद्धये जननि सेवतान्तरां
    त्वामनाकलित देवतान्तराम्॥ **20.16** ॥

यद्यादधासि करुणां यदि वा न पद्मे
    किं दैवतैस्त्वदितरैरपवर्गलिप्सोः।
तुष्टो यदि क्षितिपतिर्यदि वा न तुष्टः
    किं नाम शौरिसखि पारिषदैर्विवित्सोः॥ **20.17** ॥

दृष्टादृष्टेप्सितपुषि भवत्पादपद्मावलम्बे
　　दिष्ट्या लब्धे क इह भजतां देवतां भूष्णुरन्याम्।
दृष्टे स्पष्टं ननु दिनकरे दृश्यसन्दर्शनार्थं
　　दीपारोपव्यसनमजडो देवि कः स्वीकरोति ॥ **20.18** ॥

तव जननि जयन्त्याः शाश्वतैश्वर्यदात्र्याः
　　परिमितफलदात्रीर्देवताः सेवते कः।
फलभरनतसस्यां प्राप्य चोलक्षितिं किं
　　प्रकटमटति विन्ध्यप्रान्तभूमीरमूढः ॥ **20.19** ॥

तव जलनिधिकन्ये दैवतैः पामरोऽन्यैः
　　कलयतु समतामप्यन्ततः किं ततस्ते।
दरमपि गरिमाणं दर्दुरोऽकर्दमाया
　　विबुधपुरतटिन्या वेत्ति किं पल्वलेभ्यः ॥ **20.20** ॥

विष्णोः पत्नि भवत्प्रसादविरह व्यावर्तमानश्रियां
　　संपत्तिष्ठति सा न दीर्घमुदिता या क्षुद्रदेवार्चनैः।
अन्नालाभत एव शुष्कवपुषां कुक्षौ पुनः पीनता
　　कष्टं श्वासनिरोधनैरुपनता कालं कियन्तं क्षिपेत् ॥ **20.21** ॥

कल्याणं भवती करोति भजतामेकापि लोकाम्ब यत्
　　संभूयापि च देवतान्तरशतं नैतद्विधातुं क्षमम्।
राकाचन्द्रिकयैकयाऽपि सुकरं विश्वप्रजाह्लादनं
　　नैकाभिर्ननु तारकाभिरपि वा नो शक्यनिष्पादनम् ॥ **20.22** ॥

ननु तव पदाम्भोजद्वन्द्वे निविष्टमना मनाक्
　　अपि न तनुते देवेष्वन्येष्वमेदुरमादरम्।
ललितमृदुले लब्धाश्वासो रसालकपल्लवे
　　कलयति पिकः कञ्जावासे करीरदलानि किम् ॥ **20.23** ॥

मातः पद्मे मृत्युमत्येतुकामो
    मुक्त्वा कस्त्वां मानयेत् क्षुद्रदेवान्।
प्रौढां नावं प्राप्य सिन्धुं तरिष्यन्
    काशस्तम्बालम्बनं कश्चिकीर्षेत्॥ **20.24** ॥

संदत्ते सकृदर्चितापि भवती साम्राज्यमत्यूर्जितं
    त्वद्भिन्नैस्तु किमस्ति देवि बहुधाऽप्यासेवितैर्दैवतैः।
संशुद्धिं सकृदीक्षितोऽपि दिशति श्रीरामसेतुर्नृणाम्
    अर्थः कोऽस्ति तटाकसेतुशतकैरश्रान्तदृष्टैरपि॥ **20.25** ॥

देवि त्वत्पदपद्मवन्दनधना दुर्देवतोपासना -
    लब्धं मुग्धवधूकटाक्षतरलं नैवाद्रियन्ते धनम्।
वेधा विष्टपचित्रसृष्टिपटुधीरर्थक्रियादूरगं
    व्यामोहावहमैन्द्रजालिकजगत्सृष्टिं किमु श्लाघते॥ **20.26** ॥

सत्यप्यागसि संश्रितान् करुणया संरक्षसि त्वं रमे
    क्षोदिष्ठादपराधतोऽपि भजके कुप्यन्ति देवाः परे।
छेत्तॄणामपि तापमम्ब हरते शाखी निजच्छायया
    गाढस्पर्शत एव पोषकमपि घ्नन्ति क्रुधा पन्नगाः॥ **20.27** ॥

सुभूयानायासः फलमगुरु दुर्दैवतजुषां
    प्रयासः क्षोदीयान् फलमतिमहत् त्वां तु भजताम्।
लघिष्ठो लाभः स्याल्लवणवणिजां श्रान्तिरधिका
    भवत्यल्पो यत्नः फलमलघु कर्पूरवणिजाम्॥ **20.28** ॥

स्थास्नुः श्रेयः स भजति रमे यत्पदं त्वत्कृपायाः
    बाधोदर्कं विभवमुपयात्यन्यदेवोपसेवी।
दृष्टान्तोऽन्त्ये गिरिशभजनप्राप्त भूतिर्दशास्यः
    तद्भ्राताऽऽद्ये तव करुणया लब्धनिष्कम्पसम्पत्॥ **20.29** ॥

त्वां मातरुपासीना
    न देवतान्तरमुपासते सन्तः।
लब्धे निधौ निरवधौ
    कदर्यजनसेवनं सहन्ते के॥ **20.30** ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे देवतान्तरपरिसङ्ख्यास्तबकः विंशः॥